# Brahmaproktam Sambamahadevalinganirupanam

# બ્રહ્માપ્રોક્તં સામ્બમહાદેવલિઙ્ગનિરૂપણમ્

## Document Information

Text title : Brahmaproktam Sambamahadevalinganirupanam

File name : sAmbamahAdevalinganirUpaNambrahmAproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 15 | 153-177||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# બ્રહ્માપ્રોક્તં સામ્બમહાદેવલિઙ્ગનિરૂપણમ્

તત્રાપ્યત્યુત્તમં સ્થાનં સર્વદેવસ્તુતં સદા ।
શિવાગારમિતિ જ્ઞેયં તત્તુ સર્વોત્તમોત્તમમ્ ॥ ૧૫૩॥

તત્ર સામ્બો મહાદેવઃ સર્વદેવોત્તમોત્તમઃ ।
સર્વવેદસ્તુતો નિત્યં લિઙ્ગાકારેણ તિષ્ઠતિ ॥ ૧૫૪॥

યસ્ય ભાસા વિભાતીદં ભુવનં સચરાચરમ્ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૫૫॥

વિભાતિ યસ્ય ભાસૈવ સહસ્રકિરણો રવિઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૫૬॥

યેનૈવ ભાસ્યતે ચન્દ્રઃ પૂર્ણઃ સર્વકલાશ્રયઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૫૭॥

યેનૈવ ભાન્તિ નભસિ તારકાઃ સપ્રભા અપિ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૫૮॥

યો નિષ્કલો નિર્ગુણશ્ચ નિરાકરો નિરઞ્જનઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૫૯॥

યઃ શાન્તો નિષ્ક્રિયો નિત્યો નિરવદ્યો નિરામયઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૦॥

યઃ સર્વરૂપઃ સર્વાત્મા યઃ સર્વાન્તરગઃ સદા ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૧॥

યઃ પ્રવિશ્યાન્તરં સુપ્તં પ્રચોદયતિ માનસમ્ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૨॥

યઃ પ્રવિશ્યાન્તરં વાચં પ્રચોદયતિ સર્વગઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૩॥

યઃ પ્રવિશ્યાન્તરં જિહ્વાં પ્રચોદયતિ સર્વગઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૪॥

યઃ પ્રવિશ્યાન્તરં નિત્યમિન્દ્રિયાણી પ્રચોદયેત્ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૫॥

યદ્ભીત્યા વાતિ પવન યદ્ભીત્યોદેતિ ભાનુમાન્ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૬॥

યદ્ભીત્યા જ્વલતે વહ્નિરિન્દ્રશ્ચ કુલિશાયુધઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૭॥

યત્પ્રસાદેન વૈકુણ્ઠં પ્રાપ પૂર્વં જનાર્દનઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૮॥

યત્પ્રસાદેન લોકાનાં પાલકોઽભૂજ્જનાર્દનઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૬૯॥

યત્પ્રસાદાન્મહાલક્ષ્મી પ્રાપ પૂર્વં જનાર્દનઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૭૦॥

યત્પ્રસાદેન દીનોઽપિ જાયતે ધનિનાં વરઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૭૧॥

યત્પ્રસાદેન મોક્ષોઽપિ સુલભઃ સર્વજન્મનામ્ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૭૨॥

ન યસ્માદધિકો દેવઃ સુરાસુરનમસ્કૃતઃ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૭૩॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૭૪॥

યસ્ય સ્મરણમાત્રેણ જન્તુર્મુચ્યેત બન્ધનાત્ ।
સ એવ ભગવાંસ્તત્ર લિઙ્ગરૂપેણ તિષ્ઠતિ ॥ ૧૭૫॥

તલિઙ્ગપૂજયાનન્તફલં સમ્પ્રાપ્યતે જનૈઃ ।
તલ્લિઙ્ગપૂજાપુણ્યસ્ય નેયત્તા સત્યમુચ્યતે ॥ ૧૭૬॥

તલિઙ્ગં વીક્ષિતં યેન સ્પૃષ્ટમભ્યાર્ચિતં મુદા ।
તસ્ય પાપાનિ સર્વાણિ સત્યં નશ્યન્તિ મૂલતઃ ॥ ૧૭૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બ્રહ્માપ્રોક્તં સામ્બમહાદેવલિઙ્ગનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૫ । ૧૫૩-૧૭૭ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 15 . 153-177 ..

Notes:
While delivering the Upadeśa ઉપદેશ to Deva-s દેવાઃ, Brahmā બ્રહ્મા tells them about a certain Abode of Śiva શિવ, where He - the Sāmba Mahādeva સામ્બ મહાદેવ, who indeed is beyond all forms, yet permeating them all - resides in the form of Śivaliñga શિવલિઙ્ગ. He concludes by mentioning the merits of worshiping that Śivaliñga શિવલિઙ્ગ of Sāmba Mahādeva સામ્બ મહાદેવ.

Encoded and proofread by Ruma Dewan

---

*Brahmaproktam Sambamahadevalinganirupanam*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*